कुल प्रश्नों की संख्या : 18 ] [ कुल मुद्रित पृष्ठों की संख्या :

# S-221090–B / S-221512–B

## विषय : संस्कृत

समय : 3 घण्टे ] [ पूर्णांक : 75

**निर्देश** : (*i*) सर्वे प्रश्ना: समाधेया:।

(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न–1** अधोलिखित श्लोकस्य हिन्दीभाषया अर्थं लिखत— [3]

"त्वक्शाखापत्रमूलैश्च पुष्पफलरसादिभि:।

प्रत्यङ्गैरुपकुर्वन्ति वृक्षा: सद्भि: समं सदा॥

**प्रश्न–2** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"अज्ञानेनावृत्तो लोकस्तमसा न प्रकाशते।

लोभात् त्यजति मित्राणि सङ्गात्स्वर्गं न गच्छति॥"

*प्रश्ना:*

(*i*) केन आवृत्त: लोक: (एकपदेन उत्तरत) ?

(*ii*) 'तमसा' इति पदस्य हिन्दीभाषया अर्थं लिखत।

(*iii*) 'संसार' इति पदस्य पर्यायपदं श्लोके प्रयुक्तम्।

[3]

प्रश्न-3 अधोलिखित गद्यस्य हिन्दीभाषया अनुवादं कुरुत—

"श्रुतिः—भातृवर! मम तु कन्ये पुत्रसमे एव स्तः। एका तु चिकित्साक्षेत्रे आयुर्वेदपाठ्यक्रमे अध्ययनं करोति। अपरा संस्कृत स्नातकोत्तर पाठ्यक्रमे पठति। आवां स्वस्थौ प्रसन्नौ स्व द्वे कन्यकेऽपि च। अस्माकं सदनं सानन्दम्।"

प्रश्न-4 अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारेण प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

"अरपायाः तटे एकः लघु ग्रामः आसीत्। परसू अरपानद्यां प्रतिदिनं मत्स्याखेटं करोतिस्म। कालान्तरेण तस्य भार्या बैसाखा एकां स्वस्थां बालाम् अजनयत्। सा बालिका लावण्यवती आसीत्। लावण्येन तस्याः 'बिलासा' इति नामकरणमभवत्।"

*प्रश्नाः*

(*i*) परसू प्रतिदिनं किं करोतिस्म? (एक पदेन उत्तरत)

(*ii*) 'नामकरणमभवत्' इते वाक्ये क्रियापदम् अस्ति।

(*iii*) गद्ये 'पत्नी' इति पदस्य पर्यायपदं प्रयुक्तम्।

प्रश्न-5 अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(*क*) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते?

(*ख*) लाभानामुत्तमं किम्?

(*ग*) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(*घ*) कः न्यायाधीशः आसीत्?

(*ङ*) दीपमालिकापर्वणि कस्य शब्दः श्रुयते?

प्रश्न-6 अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(*क*) पुत्रं द्रष्टुं कः प्रस्थितः?

(*ख*) मङ्गलयानस्य मार्गः कतिधा परिवर्तितः?

(*ग*) कस्मात् पादम् आदत्ते?

(*घ*) केषां शोधकाः वृक्षाः?

(*ङ*) अस्माकं कर्तव्यं किम्?

**प्रश्न-7** द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि एक:)— [½×12=

(i) पर्यावरणम्

(ii) सदाचार:

(iii) सुभाषचन्द्र:

(iv) महाकवि: कालिदास:

**प्रश्न-8** अध: प्रदत्ते संख्ये संस्कृते लिखत— [1×2=2]

(क) 109 (ख) 150

**प्रश्न-9** रेखाङ्कित शब्दयो: प्रकृति-प्रत्ययं पृथक् कुरुत— [1×2=2]

(क) मनुष्य: सत्येन <u>देवत्वम्</u> प्राप्नोति।

(ख) रविवासरे <u>साप्ताहिक:</u> अवकाश: भवति।

**प्रश्न-10** रेखाङ्कित पदयो: सन्धिविच्छेदं कृत्वा नामानि लिखत— [1×2=2]

(क) नृप: <u>महद्दानं</u> कृतवान्।

(ख) स: <u>शीघ्रमुचलति</u>।

**प्रश्न-11** अधोलिखित पदयो: उपसर्गं चित्वा लिखत— [1×2=2]

(क) अतिरिच्यते

(ख) उत्तिष्ठति

**प्रश्न-12** समासविग्रहं कृत्वा नामानि लिखत— [1×3=3]

(क) त्रिभुवनम्

(ख) पितापुत्रौ

(ग) पतितपर्णम्

**प्रश्न-13** अधोलिखित वाक्येषु वाच्यमवबुध्य नाम लिखत— [1×3=3]

(क) तेन अहं दृश्ये।

(ख) विद्याहीनै: न शुभ्यते।

(ग) राम: पुस्तकं पठति।

**प्रश्न-14** निर्देशानुसारेण लकार परिवर्तनं कृत्वा लिखत— [1×3=3]

(क) बालकाय मोदकं रोचते (लृट्लकार)।

(ख) स: लेखं लेखिष्यति (लट्लकार)।

(ग) ते मिलन्तु (लङ्लकार)।

**प्रश्न-15** स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रेऽस्मिन् नागतौ स्याताम्। [2½×2=5]

**प्रश्न-16** स्वपाठ्यपुस्तकात् चतस्र: सूक्ती: लिखत या: प्रश्नपत्रेऽस्मिन् नागता: स्यु:। [1×4=4]

**प्रश्न-17** (अ) भवत्या नाम मनोरमा अस्ति। भवती स्वमातुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अत: अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

***अथवा***

भवान् बस्तरनगरे स्थित: मयङ्क:। भवत: मित्रं नरेश: मनहरे बालोद नगरे वसति। तं परीक्षायां सफलतायै वर्धापनं-पत्रं कोष्ठक प्रदत्त पदानां सहायतया लिखत—

(प्रसन्नता, प्राप्स्यसि, नमस्ते, वर्धापनं, अत्रकुशलं, बालोदत:, सफलतां, अपश्यम्)

स्थानम् (*i*) --------

प्रिय मित्र नरेश: मनहरे दिनाङ्क: 07-11-2021

सप्रेम (*ii*) ---------

(*iii*) -------- तत्रास्तु। अद्यैव तव परिणाम: आगत:। तव (*iv*) -------- ज्ञात्वा मम मनसि महती (*v*) -------- जाता यदा अहं तव नाम योग्यता सूचौ (*vi*) --------। त्वया सप्तशतम् अङ्का: प्राप्ता:। त्वं निश्चितरूपेण (*vii*) --------। त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम्।

अस्याम् उज्ज्वल सफलतायाम् अहं तुभ्यं हार्दिकं (*viii*) -------- यच्छामि। उज्ज्वल भविष्याय च कामये। मातृपितृचरणेषु प्रणाम:।

तव अभिन्नहृदयं मित्रम्

मयङ्क:

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत–

मातृभूमिः बहुविधैः द्रव्यैः अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा, धनेन च स्वमातृभूमेः उन्नतिं कुर्याम। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत् अतएव कथितम्—''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''

*प्रश्नाः* [1×2=2]

(क) एकपदेन उत्तरत—

(*i*) का अस्मान् उपकरोति?

(*ii*) मातृभूमिं प्रति किं भवेत्?

(ख) पूर्णवाक्येन उत्तरत— [2]

(*i*) मातृभूम्यै अस्माकं किं कर्तव्यम् अस्ति?

***अथवा***

गद्यांशस्य सारांशं संस्कृतभाषया लिखत।

प्रश्न–18 (अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(*i*) जागीरं बिलासायै दत्तवान्—

(*क*) कल्याणसायः

(*ख*) सुरेन्दसायः

(*ग*) मोहनसायः

(*घ*) गजेन्द्रसायः

(*ii*) 'बालकाः इदानीं क्रीडाक्षेत्रे' क्रीडन्ति।

अव्ययपदं वर्तते—

(*क*) बालकाः

(*ख*) क्रीडाक्षेत्रे

(*ग*) इदानीं

(*घ*) क्रीडन्ति

(*iii*) स्वकीये प्रथमप्रयासे मङ्गलग्रहं प्रति यानप्रेषणे सफलताम् अलभत्—

(क) अमेरिका

(ख) भारत:

(ग) सोवियतरूस:

(घ) यूरोपसंघ:

(*iv*) 'सुबन्त:' इति पदस्य सन्धिविच्छेदो अस्ति—

(क) सु + बन्त:

(ख) सुप् + अन्त:

(ग) सुब् + अन्त:

(घ) सुप + न्त:

(*v*) 'नम:' योगे विभक्ति: भवति—

(क) प्रथमा

(ख) तृतीया

(ग) चतुर्थी

(घ) षष्ठी

(ब) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(सप्तमी, पय:, ठक्, सन्त:, उच्चै:)

(*i*) सन्ति —— कियन्त:।

(*ii*) सभायां —— मा वद।

(*iii*) निशान्ते च पिबेत् —— ।

(*iv*) 'सखायाम्' इति पदे —— विभक्ति: अस्ति।

(*v*) 'माङ्गलिक:' इत्यस्मिन् पदे —— अस्ति।

(स) सुमेलनं कुरुत— [1×5=5]

| (क) | | (ख) |
|---|---|---|
| (i) वृक्षाः | – | धीयते |
| (ii) 'भी (भय)' योगे | – | स्वमेधया |
| (iii) अभि | – | तृतीया विभक्तिः |
| (iv) शिशुना | – | रोगाणामपहारकाः |
| (v) पादं शिष्यः | – | पञ्चमी विभक्तिः |

———